जलम् । ताम्रम् । क्लोम । औषधम् । इति मेदिनी ॥ सारसपक्षी । इत्यमरः ।२।१०।४० ॥

कमलः, पुं, (कमेः + कलच् । यद्वा को वायुः तस्य अमः गतिः तं लाति आदत्ते । क + अम + ला + कः ।) मृगविशेषः । इति मेदिनी ॥ ध्रुवकभेदः । यथा, सङ्गीतदामोदरः ॥

"उक्तो मलयतालेन लघुमध्ये स्फुरेद्ध्रुवः ।
सप्तदशाक्षरैर्युक्तः कमलोऽयं भयानके" ॥

कमला, स्त्री, (काम्यतेऽसौ कमेः वृषादित्वात् कलच् कमलं अस्त्यस्याः इति वा । अर्श + आद्यच् । टाप् च ।) लक्ष्मीः । ("कमला श्रीर्हरिप्रिया" इत्यमरः । १ । १ २८ ।) वरस्त्री । इति मेदिनी ॥ स्वनामख्यातनिम्बुकः । कमलालेबु इति भाषा । यथा,—

"रम्भाफलं तिन्तिड़ीकं कमला नागरङ्गकम् ।
फलान्येतानि भोज्यानि एभ्योऽन्यानि विवर्ज्जयेत्" ॥

इति तन्त्रसारे पुरश्चरणप्रकरणम् ॥

(छन्दोविशेषः । यथा, वृत्तरत्नाकरे ।

"द्विगुणनगणसहितः सगण इह हि विहितः ।
फणिपतिमतिविमला क्षितिप भवति कमलेति" ॥

नर्त्तकीविशेषः । यथा राजतरङ्गिण्याम् ४ । ४२४ ।

"नर्त्तकी कमला नाम कान्तिमन्तं ददर्श तम् ।
असामान्याकृतेः पुंसः सा ददर्श सविस्मया" ॥

पुरीविशेषः । यथा तत्रैव ४ । ४८३ ।

"राजा मङ्गलपुरवत् चक्रे विपुलकेशवम् ।
कमला सा स्वनाम्नापि कमलाख्यं पुरं व्यधात्" ॥

गङ्गा । यथा काशीखण्डे २९ । ४४ ।

"कमला कल्पलतिका काली कलुषवैरिणी" ॥)

कमलासनः, पुं, (कमलमासनमस्य । विष्णोर्नाभिपद्मजातत्वात् तथात्वम् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ ॥ (यथा भागवते ५ । २० । ३० । "यस्मिन् बृहत्पुष्करं ज्वलनशिखामलकनकपत्रायुतायुतं भगवतः कमलासनस्याध्यासनं परिकल्पितम्" ॥

स्त्री, कमलाया लक्ष्म्या असनं क्षेपणं दानमित्यर्थः । यथा, शम्भुविरचिते राजेन्द्रकर्णपूरे ५३ ।

"तात्पर्य्यं कमलासने विचरितं गौरिहितैः मालिता" ॥

"कमलाया लक्ष्म्या असने क्षेपणे याचकेभ्यो दाने इत्यर्थः । अथच कमलरूपे विष्टरे ब्रह्मणः पद्मासनत्वात्" । इति तट्टीका ॥)

कमलिनी, स्त्री, (कमलानि सन्त्यत्र । पुष्करादिभ्यो देशे इति इनिः ।) पद्मिनी । (यथा रघुः ९ । २७ ।

"अभिययुः सरसो मधुसम्भृतां कमलिनीमलिनीरपतत्रिणः" ॥) पद्माकरः । इति शब्दरत्नावली ॥ (गङ्गा यथा काशीखण्डे २९ । ४० ।

"कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी" ॥)

कमलोत्तरं, क्ली, (कमलमिव उत्तरं । यद्वा कमलादुत्तरं उत्कृष्टमिव ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ९ । १०६ ॥

कमा, स्त्री, (कम णिङ्भावे बाहुलकात् स्त्रियां भावे अः । टाप् ।) शोभा । इति राजनिर्घण्टः ॥

कमिता, [ऋ] त्रि, (कम + णिङ्भावे तृच् ।) कामुकः । इत्यमरः । ३ । १ । २३ ॥

कम्पः, पुं, (कपि चलने + भावे घञ् ।) गात्रादिचलनम् । तत्पर्य्यायः । वेपथुः २ । इत्यमरः १ । ७ । ३८ ॥ वेपनम् ३ वेपः ४ कम्पनम् ५ । इति राजनिर्घण्टः ॥ (यथा विक्रमोर्व्वश्याम् । "मुञ्चति न तावदस्या भयकम्पः कुसुमकोमलं हृदयम्" । "न कम्पो वायुना विना" । इति वैद्यकम् ॥)

कम्पनं, त्रि, (कपि चलनशब्दार्थादिति युच् ।) कम्पयुक्तः । काँपुने इति भाषा । तत्पर्य्यायः । चलनम् २ कम्पम् ३ चलम् ४ लोलम् ५ चलाचलम् ६ चञ्चलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमरः । ३ । १ । ७४ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥

(यथा महाभारते १३ । १४ । ७२ ।

"हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पनः" ॥

यथा सिद्धान्तकौमुद्याम् ॥ "कम्पा कम्पना शाखा" । पा ३।२ । १५३ ॥ कपि + भावे + ल्युट् ।) कम्पे क्ली । इति मेदिनी ॥

कम्पनः, पुं, (कम्पयति वेपथुयुक्तं करोति शिशिरेणेति यावत् कपि + णिच् + युच् । ल्युर्वा ।) शिशिरर्त्तुः । इति राजनिर्घण्टः ॥

(नृपविशेषः । यथा महाभारते २ । ४ । २२ ।

"काम्बोजराजः कमठः कम्पनश्च महाबलः ।
सततं कम्पयामास यवनानेक एव यः" ॥)

कम्पलक्ष्मा, [न्] पुं, (कम्पः चलनं लक्ष्म लक्षणं यस्य ।) वायुः । इति शब्दरत्नावली ॥

कम्पाकः, पुं, (कम्पया चलनेन कायति प्रकाशते इति । कम्प + कै + कः ।) वायुः । इति हेमचन्द्रः ॥

कम्पितं, क्ली, (कपि + भावे + क्तः ।) चलनम् । तत्पर्य्यायः । कम्पनम् २ कम्पः ३ वेपनम् ४ वेपथुः ५ । इति शब्दरत्नावली ॥ (कपि + कर्त्तरि + क्तः ।) कम्पयुक्ते त्रि ॥ (यथा रघुः । २ । १३ ।

"पृक्तस्तुषारैर्गिरिनिर्झराणा-
मनोकहाकम्पितपुष्पगन्धी" ॥)

कम्पिलः, पुं, (कम्प + इलच् ।) रोचनी । कमला गुँड़ि इति भाषा । तस्य रूपान्तराणि काम्पिल्लः । कम्पिल्लः । कम्पीलः । कम्पिल्यः । इत्यमरटीकायां मुकुटादयः ॥

कम्पिल्लकः, पुं, (कम्पिल्ल + स्वार्थे + कन् ।) वृक्षविशेषः । कमिला इति देशान्तरभाषा । तत्पर्य्यायः । रक्ताङ्गः २ रेची ३ रेचनकः ४ रक्तकः ५ लोहिताङ्गः ६ कम्पिल्लः ७ रक्तचूर्णकः ८ । तस्य गुणाः । विरेचकत्वम् । कटुत्वम् । उष्णत्वम् । व्रणकफकासजन्तुक्रिमिनाशित्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ (अस्य तैलगुणाः । तुम्बीकोशाम्रदन्तीद्रवन्तीश्यामासप्तला नीलिकाकम्पिल्लकशङ्खिनीस्नेहास्तिक्तकटुककषाया अधोभागदोषहराः क्रिमिकफकुष्ठानिलहरा दुष्टव्रणविशोधनाश्च ॥ इति सुश्रुतः ॥)

कम्प्रः, त्रि, (कपि + नमि-कम्पीति रः ।) कम्पयुक्तः । कम्पान्वितः । इत्यमरः । ३ । १ । ७४ ॥

(यथा नैषधे । १ । १४२ ।

"सुताः कमाहय चिराय चूत्कृते-
विधाय कम्प्राणि मुखानि कं प्रति" ॥)

कम्ब, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) कम्बति । इति दुर्गादासः ॥

कम्बरः, पुं, (कम्ब + अरन् ।) चित्रवर्णः । कर्व्वुरवर्णः । तद्वति त्रि । इति शब्दरत्नावली ॥

कम्बलं, क्ली, (कम्यते । इति कमु कान्तौ + कमेर्बुक् चेति कलः । कम्बगतौ वृषादित्वात् कलच् वा ।) जलम् । इति शब्दरत्नावली ॥

कम्बलः, पुं, (कं कुत्सितं शिरो वा कं सलिलं वा बलते बल संवरणे सञ्चारणे च अच् । यद्वा कम्ब + गतौ इति धातोः वृषादित्वात् कलच् ।) स्वनामख्यातमेषादिलोमरचितवस्त्रासनादि । तत्पर्य्यायः । रल्लकः २ । इत्यमरः । २ । ६ । ११६ ॥ वेशकः ३ रोमयोनिः ४ रेणुका ५ । इति शब्दरत्नावली ॥ प्रावारः ६ । इति जटाधरः ॥

(यथा महाभारते ३ । ३ । ५१ ।

"न तथा सुखयत्यग्निर्न प्रावारा न कम्बलाः ।
शीतवातार्दितं लोकं यथा तव मरीचयः" ॥)

नागराजः । सास्ना । प्रावारः । क्रिमिः । इत्यमरः । ३ । ३ । १९३ । मेदिनी च । उत्तरासङ्गः । इति मेदिनी ॥ मृगविशेषः । इति जटाधरः ॥

(नागभेदौ । अनयोरेकः अधस्तात् पाताले वासुकिप्रमुखो निवसति अपरस्तु वरुणदेवसभास्थः । यथाक्रमं उदाहरणे द्रष्टव्ये ।

यथा, भागवते ५ । २४ । ३१ ।

"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूड़कम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ॥

यथा महाभारते । २ । ९ । ९ ।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ" ॥

कम्बलाद्यधिष्ठितप्रयागान्तर्वर्त्तितीर्थविशेषः । यथा, महाभारते । ३ । तीर्थयात्रापर्व्वणि ८५ । ७५ ।

"प्रयागं सप्रतिष्ठानं कम्बलाश्वतरौ तथा ।
तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः" ॥

कम्बलिवाह्यकं, क्ली, (कम्बलः सास्ना अस्ति एषाम् इति इनिः । कम्बलिभिर्बलीवर्द्दैरुह्यते । वह + कर्म्मणि ण्यत् स्वार्थे संज्ञायां वा कन् ।) वृषवहनीयशकटम् । तत्पर्य्यायः । गन्त्री २ । इत्यमरः । २ । ८ । ५२ ॥ गान्त्री ३ । इति तट्टीका ॥

कम्बिः, स्त्री, (कमु + बाहुलकात् + विन् । यद्वा कम्बति प्राप्नोति जानाति वा अन्नादि अनया । कम्ब + करणे इन् ।) दर्व्विः । इत्यमरः । २ । ९ । ३४ । हाता इति भाषा ॥ इति मेदिनी । वंशांशः । बाँशेर पाब् इति भाषा ॥

कम्बुः, पुं स्त्री, (कमु + जत्रादयश्चेति निपातनात् । साधुः । कमु + उन् बुक् चेति वा ।) शङ्खः । इत्यमरः । १ । १० । २३ ॥ (यथा भागवते । ४ । ७ । २० ।

"कम्ब्वब्जचक्रशरचापगदासिचर्म्म-
व्यग्रैर्हिरण्मयभुजैरिव कर्णिकारः" ॥)

कम्बुः, पुं, (कम्ब गतौ इति मृगय्वादित्वात् उन् बुगागमो वा । निपातनात् वा साधुः ॥) वलयम् ।